Guru Stotram

गुरुस्तोत्रम्

SHLOKA · श्लोक

1 अखण्डमण्डलाकारं व्याप्तं येन चराचरम्।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः॥

2 अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः॥

3 गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः।
गुरुरेव परं ब्रह्म तस्मै श्रीगुरवे नमः॥

4 स्थावरं जङ्गमं व्याप्तं यत्किञ्चित्सचराचरम्।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः॥

5 चिन्मयं व्यापि यत्सर्वं त्रैलोक्यं सचराचरम्।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः॥

6 सर्वश्रुतिशिरोरत्नविराजितपदाम्बुजः।
वेदान्ताम्बुजसूर्यो यस्तस्मै श्रीगुरवे नमः॥

7 चैतन्यः शाश्वतः शान्तो व्योमातीतो निरञ्जनः।
बिन्दुनादकलातीतस्तस्मै श्रीगुरवे नमः॥

8 ज्ञानशक्तिसमारूढः तत्त्वमालाविभूषितः।
भुक्तिमुक्तिप्रदाता च तस्मै श्रीगुरवे नमः॥

9 अनेकजन्मसम्प्राप्तकर्मबन्धविदाहिने।
आत्मज्ञानप्रदानेन तस्मै श्रीगुरवे नमः॥

10 शोषणं भवसिन्धोश्च ज्ञापनं सारसम्पदः।
गुरोः पादोदकं सम्यक् तस्मै श्रीगुरवे नमः॥

11 न गुरोरधिकं तत्त्वं न गुरोरधिकं तपः।
तत्त्वज्ञानात् परं नास्ति तस्मै श्रीगुरवे नमः॥

12 मन्नाथः श्रीजगन्नाथः मद्गुरुः श्रीजगद्गुरुः।
मदात्मा सर्वभूतात्मा तस्मै श्रीगुरवे नमः॥

13 गुरुरादिरनादिश्च गुरुः परमदैवतम्।
गुरोः परतरं नास्ति तस्मै श्रीगुरवे नमः॥